## ॥ अथ सप्तमोऽध्यायः प्रारभ्यते ॥

### तत्रैकोनचत्वारिंशत्क्षेत्राणि सन्ति।[१]

### अत्राङ्कैर्गणितप्रकारा निरूपिताः ॥

१ अङ्को नाम रूपाणां समुदायः। तन्मते रूपेऽङ्कत्वाभावः। अन्ये तु गणनायोग्यमङ्कं वदन्ति तन्मते रूपेप्यङ्कत्वमस्ति गणनायोग्यत्वात्।

२ यत्र लघ्वङ्को बृहदङ्कादसकृत् शोधितः सन्[२] बृहदङ्को निःशेषः स्यात् तदा लघ्वङ्को बृहदङ्कस्यांशोऽस्ति। बृहदङ्को गुणगुणितलघ्वङ्कतुल्योऽस्ति।

३ यस्य भागद्वयं समानं भवति स समाङ्को ज्ञेयः।

४ यस्य भागद्वयं समानं न भवति स विषमाङ्को ज्ञेयः।

५ समाङ्को यद्येकेन हीनोऽधिको वा भवति सोऽपि विषमाङ्को ज्ञेयः।

६ समाङ्को द्विविधः। एकः समसमः ८। एकः समविषमः ६।

७ समसमो यथा। समाङ्कः समेन ह्रियमाणः समा लब्धिः प्राप्यते स समसमः।

८ यः समाङ्कः समेन ह्रियमाणः विषमा लब्धिः प्राप्यते स समविषमो ज्ञेयः।

९ अथ विषमविषमाङ्कलक्षणम्। विषमाङ्को विषमेण ह्रियमाणः विषमा लब्धिः प्राप्यते स विषमविषमाङ्कः। यथा नवाङ्कः (९) त्रिभक्तः त्रयं प्राप्यते।

१० योऽङ्को रूपातिरिक्ताङ्केन निःशेषो न भवति स प्रथमोऽङ्को ज्ञेयः। यथैकादशाङ्कः।

११ यो रूपातिरिक्ताङ्केन विभागार्हः स योगाङ्को ज्ञेयः।

---

१ तत्र ऊन° K. २ Omitted in K.

१२ यावङ्कौ रूपातिरिक्ताङ्केन भक्तौ निःशेषौ भवतस्तावङ्कौ मिलित-संज्ञौ ज्ञेयौ ।

१३ यावङ्कावेकातिरिक्तः कोऽपि हरो निःशेषं न करोति तौ भिन्नाङ्कौ ज्ञेयौ ।

१४ योऽङ्कः स्वेनैव गुणितः फलं तस्यैव वर्गो भवति ।

१५ योऽङ्कः स्ववर्गेण गुणितः घनसंज्ञो भवति ।

१६ गुण्याङ्कगुणकाङ्कयोर्घातो गुणनफलं क्षेत्रफलं भवति ।

१७ गुण्यगुणकौ भुजसंज्ञौ भवतः ।

१८ क्षेत्रफलं केनचिदङ्केन गुणितं घनफलं भवति ।

१९ यत्र प्रथमाङ्को यद्गुणितो द्वितीयाङ्कतुल्यो भवति तद्गुणगुणितस्तृतीयाङ्कश्चतुर्थाङ्कतुल्यो भवति तदा तेऽङ्काः सजातीया भवन्ति ।

२० क्षेत्रफलघनफले ते सजातीये भवतो ययोर्भुजावेकरूपौ सजातीयौ भवतः ।

२१ योऽङ्कः स्वलब्धियोगतुल्यो भवति स पूर्णसंज्ञो ज्ञेयः । यथा षट् ॥

॥ इति परिभाषा ॥

## अथ प्रथमं क्षेत्रम् ॥ १ ॥

**ययो राश्योः परस्परं भाजितयोरन्ते रूपं शेषं स्यात् तौ राशी भिन्नसंज्ञौ ज्ञेयौ ।**

यथा **अबं** बृहद्राशिः कल्पितः । **जदं** लघुराशिः कल्पितः । **जदं** **अब**मध्ये मुहुः शोधितं शेषं **तअं** तत् **जदा**दूनमवशिष्टम् । पुनस्त**अं** **जदा**न्मुहुः शोधितं शेषं **जवं** तत् **तआ**दूनं जातम् । एत **तअ**मध्ये मुहुः शोधितं शेषं **कअं** रूपम् । तस्मात् **अबजद**राशी भिन्नौ स्तः ।

अस्योपपत्तिः ।

यद्येतौ भिन्नौ न भवतः तदाऽन्यौ राशी कल्पनीयौ । **हझ**मुभयो-